# उत्कलदिवसमहोत्सवः



राष्ट्रियसंस्कृतविद्यापीठस्य उत्कलपीठेन अप्रैलमासस्य प्रथमदिनाङ्के (1st April) उत्कलदिवसमहोत्सवः महता वैभवेन पर्यपाल्यत । **1936** ख्रीष्टाब्दस्य अप्रैलमासस्य प्रथमदिनाङ्के उत्कलराज्यं भाषाभित्तिकं स्वातन्त्रमलभत इति हेतोः दिनमिदं सर्वैः उत्कलीयैः उत्कलस्य इतिहासं गौरवं संस्मर्य साटोपं परिपाल्यते । अस्मिन्नेव क्रमे विद्यापीठस्य अन्तर्दौवारिकक्रीडाङ्गणे मान्यकुलपतीनाम् **आचार्य वि.मुरलीधरशर्ममहोदयानाम्** आध्यक्ष्ये एका विशिष्टव्याख्यानसभा समायोज्यत ।

अस्यां सभायां श्रीजगन्नाथसंस्कृतविश्वविद्यालस्य कुलपतिचराः **प्रो.किशोरचन्द्रपाढिमहोदयाः** सारस्वतातिथिरूपेण समागत्य उत्कलीयसंस्कृतेः तथा इतिहासस्य च वैशिष्ट्यं विस्तरेण प्रत्यपादयन् । कुलपतयः स्वाभिभाषणे उत्कलस्य परम्परां प्रतिपाद्य छात्राणां कृते स्वीयाशिषं प्रायच्छन् । अवसरेऽस्मिन् विद्यापीठस्य कुलसचिवाः आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहोदयाः तथा शैक्षिकसङ्कायप्रमुखाः सारस्वातिथिरूपेण च समुपस्थाय उत्कलवैभवं व्यवृण्वन् । उत्कलपीठस्य परामर्शदातारः राधागोविन्दत्रिपाठिमहोदयाः अतिथीनां स्वागतं व्यदधुः । उत्कलपीठस्य संयोजकाः **डॉ.निरञ्जनमिश्रमहोदयाः** सभां समचाल्यन्त । सभान्ते सांस्कृतिककार्यक्रमाः समायोज्यन्त । सन्दर्भेऽस्मिन् उत्कलदिवसमुपलक्ष्य समायोजितासु भाषण-प्रबन्धलेखन-नृत्य-गीतगान-एकपात्राभिनय-रसप्रश्नादिस्पर्धासु विजेतृभ्यः मान्यैः अतिथिभिः कुलपतिभिश्च प्रमाणपत्रं प्रदत्तम् । अन्ते श्रीजगन्नाथस्य प्रसादसेवनव्यवस्थाऽऽसीत् ।